पाः, त्रि, (पिबतीति । पा पाने + क्विप् ।) पानकर्त्ता ॥ (पाति रक्षतीति । पा रक्षणे + क्विप् ।) रक्षणकर्त्ता । ("विश्वं पातीति विश्वपाः ।" इति मुग्धबोधव्याकरणम् ॥)

पांशवः, पुं, (पांशोर्लवणविशेषस्य विकारः । पांशु + अण् ।) लवणविशेषः । पाङ्गा लोन इति भाषा ॥ तत्पर्य्यायः । रोमकम् २ औद्भिज्जम् ३ वसुकम् ४ वसुपांशुः ५ ऊषरजम् ६ औषरम् ७ ऐरिणम् ८ और्व्वम् ९ सहम् १० । अस्य गुणाः । तीक्ष्णत्वम् । अत्युष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । पित्तकोपकरत्वञ्च । इति राजनिर्घण्टः ॥

"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनम् ॥"
इति भावप्रकाशः ॥

पांशुः, पुं, (पंशयति नाशयति आत्मानमिति । पशि नाशने + "अर्ज्जिदृशिकमीति ।" उणां । १ । २८ । इति कुः दीर्घश्च ।) धूलिः । इत्यमरः । २ । ८ । ९८ ॥ (यथा, मनुः । ४ । १०२ ।
"कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥")
शुष्कार्द्धचिरसञ्चितगोमयः । सार इति भाषा ॥ इति मेदिनी । शे, ११ ॥ पर्पटः । कर्पूरविशेषः । इति राजनिर्घण्टः ॥ (दन्त्यसकारान्तोऽपि दृश्यते ॥)

पांशुकाशीसं, क्ली, (पांशुरिव कासीसम् ।) कासीसम् । इति राजनिर्घण्टः ॥

पांशुकुली, स्त्री, (पांशुना कोलति आकुलीभवतीति । कुल + कः । ततः स्त्रियां ङीष् ।) राजमार्गः । यथा । "रथ्या पांशुकुली भवेत् ।" इति हारावली । ११२ ॥

पांशुकूलं, क्ली, (पांशोः कूलमिव ।) अनामपट्टोलिका । यथा, त्रिकाण्डशेषे ।
"शासनं धर्म्मकीलः स्यान्मुकुतिः शूद्रशासनम् ।
पट्टोलिका कूटमकीला पांशुकूलं न कस्यचित् ॥"

पांशुचत्वरः, पुं, (पांशुभिश्चत्वर इव ।) घनोपलः । इति शब्दमाला ॥

पांशुचन्दनः, पुं, (पांशुश्चिताभस्मरजश्चन्दनमिव यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥

पांशुचामरः, पुं, (पांशुर्धूलिश्चामर इव यस्य ।) पटवासः । इति जटाधरः ॥ ताँबु इति भाषा ॥ (पांशौ दूर्व्वा चामर इव यस्य ।) दूर्व्वाचिततटी भूमिः । वर्हापकः । प्रशंसा । पुरोटिः । धूलिगुच्छकः । इति मेदिनी । रे, ३०५ ॥

पांशुजं, क्ली, (पांशोर्जायते इति । पांशु + जन् + डः ।) पांशुलवणम् । पाङ्गा लोन इति भाषा ॥ तत्पर्य्यायः । ऊषम् २ औद्भिदम् ३ । पाक्यम् ४ लवणम् ५ पटु ६ । इति रत्नमाला ॥ अस्य गुणाः । भेदकत्वम् । पाचनत्वम् । पित्तकारित्वम् । इति राजवल्लभः ॥

पांशुपत्रं, क्ली, (पांशुः कर्पूर इव सुगन्धि पत्रमस्य ।) वास्तूकम् । इति शब्दमाला ॥

पांशुमर्द्दनः, पुं, (मृद्यतेऽसाविति । मृद् + ल्युट् । मर्द्दनः । ततः पांशुः मर्द्दनो यत्र । यद्वा पांशोर्मर्द्दनं यत्र ।) केदारः । इति त्रिकाण्डशेषः ॥

पांशुरः, पुं, (पांशुं चिरसञ्चितगोमयादिकसत्पत्तित्वेन रातीति । पांशु + रा + कः ।) दंशकः । डाँश इति भाषा ॥ पीठसर्पी । खञ्जः । इति हारावली । १२३ ॥ (पांशुरस्यास्तीति । "नगपांशुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिं इति रः । पांशुविशिष्टे, त्रि ॥ यथा, ऋग्वेदे । १ । २२ । १७ ।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांशु(सु)रे ॥")

पांशुरागिणी, स्त्री, (पांशुरागो विद्यतेऽस्याः । इनिः स्त्रियां ङीप् च ।) महामेदा । इति राजनिर्घण्टः ॥

पांशुलः, पुं, (पांशुर्विद्यतेऽस्य । पांशु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) हरः । पापी । इति शब्दरत्नावली ॥ पुंश्चलः । शम्भोः खट्वाङ्गम् । इति मेदिनी । ले, १०८ ॥ पूतिकः । काँटाकरञ्ज इति भाषा ॥ इति शब्दचन्द्रिका ॥ पांशुयुक्ते त्रि । इति धरणिः ॥ (पांशुर्दोषः पापञ्च तद्युक्ते च त्रि । यथा, रघुः । २ ।
"तस्याः खुरन्यासपवित्रपांशु
मपांशुलानां धुरि कीर्त्तनीया ।
मार्गं मनुष्येश्वरधर्म्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥")

पांशुला, स्त्री, (पांशुल + टाप् ।) कुलटा । भूमिः । इति शब्दरत्नावली ॥ केतकी । रजस्वला । इति राजनिर्घण्टः ॥

पांसनः, त्रि, (पंसयति गुणादिकं नाशयतीति । पसि + ल्युः । बाहुलकात् दीर्घः ।) दूषकः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १५४ । ३३ ॥
"निराबाधास्त्वयि हते मया राक्षसपांसन ! ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥")

पांसुः, पुं, (पंसयतीति । पसि नाशने + "अर्ज्जिदृशिकमीति ।" उणां । १ । २८ । इति कुर्दीर्घश्च ।) धूलिः । (यथा, रामायणे । २ । ८० । ९ ।
"अपरे पूरयन् कूपान् पांसुभिः श्वभ्रमायतम् ।
निम्नभागांस्तथैवाशु समांश्चक्रुः समन्ततः ॥")
चिरसञ्चितगोमयम् । इत्युणादिकोषः भरतश्च ॥ सार इति भाषा ॥

पाकः, पुं, (पच् + भावे घञ् ।) पचनम् । क्लेदनम् । तत्पर्य्यायः । पचा २ । इत्यमरः । ३ । २ । ८ ॥ रन्धनम् । स तु सप्तप्रकारो यथा,—
"भर्ज्जनं तलनं स्वेदः पचनं क्वथनं तथा ।
तान्दूरं पुटपाकश्च पाकः सप्तविधो मतः ॥"
भर्ज्जनं केवलपात्रे । तलनं स्नेहद्रव्ये । स्वेदनं अम्बुवाष्पे । पचनं जले । क्वथनं सिद्धद्रव्यरसग्रहणे । तान्दूरं अङ्गारवह्नितप्तयन्त्रे । पुटपाकः अधोर्द्ध्वाग्नितापे ज्ञेयः । इति पाकराजेश्वरः ॥
स्थालीमार्ज्जनाद्योदनपरीक्षान्तो व्यापारनिचयः पाकः । इति स्मृतिः ॥ * ॥ पाकभाण्डस्य त्याज्यत्वं यथा,—
"नित्यं नूतनभाण्डेन कर्त्तव्यः पाक एव च ।
अथवा पक्षपर्य्यन्तं ततस्त्याज्यं मनीषिभिः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
पाककाले शूद्रायाग्निदाननिषेधो यथा,—
"शूद्रायाग्निञ्च यो दद्यात् पाककाले विशेषतः ।
शूद्रापक्वं भवेदन्नं ब्राह्मणः शूद्रतामियात् ॥"
इति कर्म्मलोचनम् ॥ * ॥
एकोद्दिष्टश्राद्धे तस्य नित्यत्वं यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहःसमुपोषणम् ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
तस्य विधिर्यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अग्न्याशाभिमुखे पक्वमन्नतान्नं विजानता ।
पूर्व्वामुखो धर्म्मकामः शोकहानिश्च दक्षिणे ॥
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्त्वा दरिद्रो जायते नरः ॥
यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्त्वा चक्षुर्हानिर्नृणां भवति वै ध्रुवम् ॥
पितृभ्यां पक्वमन्नञ्च पितृयेण यशस्विनि ! ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं शोणितं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वन्तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥
उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्द्दन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत् ।
गर्हितान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत् ।
अप्रजा या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कलिचण्डातकस्यैव वचावारुणकस्य च ।
भेरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥
यदा मृण्मयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टौ च तत्पाकं विसृजेत् गृही ॥
धनुः पाके तथा सिंहे मिथुने वा वरानने ! ।
यः कुर्याद्भोजनं देवि ! कृच्छ्रेणैव विशुध्यति ॥
एकदा तु जलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"
इति मत्स्यसूक्ते ४२ पटलः ॥ * ॥
परिणतिः । (यथा, मार्कण्डेये । ७० । ३४ ।
"स्वकर्म्मफलपाकेन भर्त्तुस्तस्य महात्मनः ।
वियोजिताहं तद्धेतुरयमासीत् निशाचरः ॥"
पिबति स्तन्यादिकं इति । पा पाने + "इण्भीकापाशल्यतिमर्च्चिभ्यः कन् ।" उणां । ३ । ४३ । इति कन् ।) शिशुः । जरया केशस्य शौक्ल्यम् । स्थाल्यादि । इति मेदिनी । के, २९ ॥